इयम् आकाशवाणी

दिनाङ्कः - 17.11.2024 सायम्  - 06:20

मुख्यवार्ताः

- प्रधानमन्त्री नरेन्द्रमोदी अद्य अबुजानगरे नाइजीरिया-देशस्य राष्ट्रपतिना बोला-अहमद-टिनुबू-इत्यमुना साकं मन्त्रणां करिष्यति।

- महाराष्ट्र झारखण्ड राज्ययोः विधानसभानिर्वाचनाय केवलं द्वे दिने एव अवशिष्टौ स्तः। अतः प्रचाराभियानमपि तीव्रगत्यां प्रचलति।

- रक्षानुसन्धानविकाससङ्गठनेन, ह्यः ओडिशा-तटस्य समीपे डॉ. ए.पी.जे. अब्दुलकलाम द्वीपात् भारतस्य प्रथमं हाइपरसोनिक-प्रक्षेपणास्त्रस्य सफलपरीक्षणं कृतम्।

- केन्द्रीय वस्त्रमन्त्री गिरिराजसिंहः उक्तवान् यत् केन्द्रसर्वकारेण वस्त्रनिर्माणउद्योगाय गतिं प्रदातुं विजन नेक्स्ट् इति कार्यक्रमः आरब्धः।

- ऑस्ट्रेलिया, जापान संयुक्त राज्य अमेरिका च देशैः अद्य पुनः पुष्टिः कृताः यत् एते भारत-प्रशांत क्षेत्रे भारत सागरीय निरीक्षणस्य प्रयासानां समर्थनं दातुं प्रतिबद्धः वर्तन्ते।

प्रधानमन्त्री – नाइजीरिया यात्रा

प्रधानमन्त्री नरेन्द्रमोदी अद्य अबुजानगरे नाइजीरिया-देशस्य राष्ट्रपतिना बोला-अहमद-टिनुबू-इत्यमुना साकं मन्त्रणां करिष्यति। श्रीमोदी नाइजीरियाया: द्वि-दिवसीय-यात्रायै ह्य: रात्रौ अबुजानगरं सम्प्राप्तवान्। विगतेषु सप्तदशवर्षेषु कस्यापि भारतीयप्रधानमन्त्रिण: प्रथमा नाइजीरिया यात्रा विद्यते। प्रधानमन्त्री मोदी राष्ट्रपति: टीनुबू इत्येष: च नाइजीरिया-भारत-देशयो: मध्ये रणनीतिक-सहभागित्वस्य समीक्षां समाचरिष्यत: अथ च द्विपक्षीय-सम्बन्धान् अग्रे वर्धयितुं विविधेषु अवसरेषु चर्चां करिष्यत:। वार्तानन्तरम् अनेकेषु सन्धिपत्रेषु हस्ताक्षरस्य सम्भावनापि वर्तते। एतदनन्तरं प्रधानमन्त्री नाइजीरियायां भारतीय-प्रवासिभ्य: सम्बोधनमपि करिष्यति। नाइजीरियादेशः प्रधानमन्त्री मोदी इत्यस्य कृते 'ग्राण्ड कमाण्डर ऑफ द आर्डर् आफ् द नाइजर' इत्यस्य सम्मानं प्रदत्त:। सः द्वितीयः विदेशीयः गणमान्यः भविष्यति यः एतत् सम्मानं लब्ध:। अस्मिन्नेव पूर्वे ऊनसप्तत्यधिकोनविंशतमे वर्षे राज्ञी एलिजाबेथ इत्यस्याः कृते सम्मानमिदं प्राप्तवती आसीत्। तदनु श्व: श्रीमोदी राष्ट्रपतिना लुइस-इनासियो-लूला-दा-सिल्वा इत्यनेन आयोक्ष्यमाणे जी-विंशति: शिखरसम्मेलने भागग्रहणाय द्विदिवसीययात्रार्थं ब्राजीलदेशस्य रियोडिजेनेरियो-नगरं प्रति यास्यति। ध्यातव्यमस्ति भारतं ब्राजील-दक्षिणाफ्रीका-देशाभ्यां सह जी-विंशति: इत्यस्य शिखरसम्मेलनस्य भागमस्ति इति। अपि च प्रचल्यमाणस्य जी-विंशति: शिखरसम्मेलनस्य चर्चासु सक्रियत्वेन योगदानं प्रददाति। कार्यक्रमावधौ प्रधानमन्त्री विभिन्नेषु वैश्विकप्रसङ्गेषु भारतस्य स्थितिं प्रकटयिष्यति। भारतेन आयोजिते वॉयस ऑफ द ग्लोबल-साउथ-इत्यस्मिन् शिखर सम्मेलनेऽपि चर्चां विधास्यति। तृतीये अन्तिमे च यात्राया: सोपाने प्रधानमन्त्री अस्य मासस्य नवदशत: एकविंशति दिनाङ्कं यावत् गुयानादेशाय यास्यति।

महाराष्ट्र-झारखण्ड विधानसभा चुनाव

महाराष्ट्र झारखण्ड राज्ययोः विधानसभानिर्वाचनाय केवलं द्वे दिने एव अवशिष्टौ स्तः। अतः प्रचाराभियानमपि तीव्रगत्यां प्रचलति। महाराष्ट्रे नवम्बरमासस्य विंशतिः दिनाङ्के एकस्मिन् चरणे एव निर्वाचनं भविष्यति। राज्ये अष्टाशीत्यधिक द्विशतं विधानसभा आसनानां कृते षड्त्रिंशत्यधिकैक शतोत्तर चतुःसहस्रं यावत् अभ्यर्थिनः भाग्यस्य परीक्षणं करिष्यन्ति। तेषु एकसप्तत्यधिक सप्तशतोत्तर त्रिसहस्रं यावत् पुरुषाः, त्रिषष्ठ्योत्तर त्रिशतं महिला अभ्यर्थिनः च सन्ति । महिलाप्रतिनिधिनां कृते अस्य निर्वाचनस्य विशिष्टं महत्त्वं वर्तते। अवधेयं वर्तते यत् महाराष्ट्रस्य विधानसभायाः कृते महिलानां सहभागितायाः समृद्धः इतिहासः अस्ति । सप्त पञ्चाशदधिक ऊनविंशति शततमे वर्षे विधानसभायाः आरम्भे एकषष्ठ्योत्तर चतुःशतं यावत् महिलाः निर्वाचिताः। तासां राज्यस्य राजनैतिकपरिदृश्ये महत्त्वपूर्णं योगदानम् अस्ति ।

झारखण्डे द्वितीयचरणस्य विधानसभानिर्वाचनस्य प्रचारः श्वः सायं समाप्तः भविष्यति। मतदातृन् आकर्षयितुं विभिन्नराजनैतिकदलानां नेतारः सर्वविध प्रयासरताः सन्ति। बोकारो मण्डलस्य गोमियायां एकां नैर्वाचनिक जनसभां सम्बोधयन् भाजपायाः अध्यक्ष: जेपी नड्डा झारखण्डे असीमित भ्रष्टाचाराय कुशासनाय च हेमन्त सोरेनं आरोपितवान् ।

जेपी नड्डा

अपरपक्षे झामुमोदलस्य वरिष्ठनेता मुख्यमन्त्री च हेमन्त सोरेनः अपि भाजपा दले आरोपं कृतवान्। दुमकायां निर्वाचनसभां सम्बोधयन् श्रीसोरेनः अवदत् यत् भाजपा दलं जनान् मुख्यविषयेभ्यः विमुखी कर्तुं प्रयासं करोति।

हेमन्त सोरेन

हिमन्तविश्वसर्मा, चम्पाई सोरेन इत्यादयः अनेके भाजपानेतारः अपि एनडीए-प्रत्याशिनां समर्थने सभायां सम्बोधनं कुर्वन्तः सन्ति। झारखण्डस्य विभिन्नेषु भागेषु काङ्ग्रेस-राजद-अजसू-वामपक्षीयदलानां च नेतारः सभाः, पथप्रदर्शनानि च कुर्वन्ति। मतदानस्य द्वितीयान्तिमः चरणाय मतदानं नवम्बर मासस्य विंशतिः दिनाङ्के भविष्यति। अस्यैव मासस्य त्रयोविंशे दिनाङ्के मतगणनापि भविष्यति।

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

डीआरडीओ

डीआरडीओ इति रक्षाअनुसन्धानविकाससङ्गठनेन, ह्यः ओडिशा-तटस्य समीपे डॉ. ए.पी.जे. अब्दुलकलाम द्वीपात् भारतस्य प्रथमं हाइपरसोनिक-प्रक्षेपणास्त्रस्य सफलपरीक्षणं कृतम्। अस्य प्रक्षेपणास्त्रस्य निर्माणं सशस्त्रसेनायाः कृते पञ्चदशशत-कि.मी.परिमितात् अधिकपर्यन्तं विविधानि पेलोड आदि-वहनार्थं निर्मितम् अस्ति । रक्षामन्त्री राजनाथसिंहः सामाजिक संजालीय सन्देशे उड्डयन-परीक्षणस्य ऐतिहासिक-उपार्जनस्य वर्णनं कृतवान्। उक्तं च यत् एतेन भारतं एतादृशानां महत्त्वपूर्णानां उन्नतानां च सैन्य-प्रौद्योगिकीनां क्षमतायुक्तानां शीर्ष-राष्ट्रानां समूहे स्थापितवान्। सः सफलविमानपरीक्षणाय डीआरडीओ, सशस्त्रसेनां, उद्योगं च अभिनन्दितवान्।

श्रीलंका राष्ट्रपति निर्वाचन

श्रीलङ्कादेशे श्वः राष्ट्रपति सचिवालये राष्ट्रपति: अनुरा-कुमार-दिसा-नायके इत्यस्य उपस्थितौ सर्वकारस्य नवमन्त्रिमण्डलस्य शपथग्रहणसमारोहः भविष्यति। श्रीलङ्कादेशस्य स्थानीयवार्ता वाहिन्यानुसारि राष्ट्रपतिः त्रयोविंशति: सदस्यीयं मन्त्रिमण्डलं नियोजयितुं योजनां विधास्यते, यत्र रक्षावित्तयोः प्रमुखविभागाः स्वनेतृत्वे स्थापिताः सन्ति। वार्ता वाहिन्यानुसारं डॉ. हरिणी अमरा सूर्या पुनः प्रधानमन्त्रीरूपेण नियुक्तः भविष्यति, विजिता हेराथः विदेशमन्त्रीरूपेण एव नियुक्तः भविष्यति।

टीडीएमएम इंडियन मेरीटाइम

ऑस्ट्रेलिया, जापान संयुक्त राज्य अमेरिका च देशैः अद्य पुनः पुष्टिः कृताः यत् एते भारत-प्रशांत क्षेत्रे भारत सागरीय निरीक्षणस्य प्रयासानां समर्थनं दातुं प्रतिबद्धः वर्तन्ते। अद्य ऑस्ट्रेलियायाः डार्विननगरे चतुर्दशतमे त्रिपक्षीयोपवेशनं सञ्जातम्। अस्मिन्नोपवेशने ऑस्ट्रेलियायाः उपप्रधान मंत्री रक्षा मंत्री, रिचर्ड मार्लेस, जापानदेशस्य रक्षामंत्री नकतानी जैन अथ च अमेरिकीय रक्षा सचिवः लॉयड ऑस्टिन भागं गृहीतवन्तः। अस्मिन् उपवेशने एभिः सागरीय निरीक्षणे सहयोगं दातुं भारतस्य महत्वपूर्णां भूमिकां प्रतिपादवन्तः।

चेन्नई-गिरिराज

केन्द्रीय वस्त्रमन्त्री गिरिराजसिंहः उक्तवान् यत् केन्द्रसर्वकारेण वस्त्रनिर्माणउद्योगाय गतिं प्रदातुं विजन नेक्स्ट् इति कार्यक्रमः आरब्धः। अद्य चेन्नैनगरे NIFT इति राष्ट्रिय फैशन प्रौद्योगिकी

संस्थाने समीक्षोपवेशनानन्तरं वार्ताहरैः सह संवादे सः अवदत् यत् भारते वस्त्रनिर्माणउद्योगस्य मूल्यं षटसप्तत्यधिकैक शत् अर्बुद् डॉलर पर्यन्तं वर्धितम् अस्ति।

हॉकी प्रतिस्पर्धा

महिलानां एशियाई-चैम्पियन्स-ट्राफी हॉकी इति प्रतिस्पर्धा, अद्य बिहारस्य राजगीर-हॉकी-क्रीडाङ्गणे भारत-जापानदलयो: मध्ये प्रचलति ध्यातव्यम् अस्ति यत् इयं प्रतिस्पर्धा भारतीयसमयानुसारं पादोनपञ्चवादने समारब्ध:।

।।इति वार्ता:।।